# Shiva Stuti by Brahmadya and Pushkareshvara Mahima Varnanam by Shiva

# ब्रह्माद्याकृता शिवस्तुतिरेवं शिवप्रोक्तं पुष्करेश्वरमहिमवर्णनम्

## Document Information

Text title : Shiva Stuti by Brahmadya and Pushkareshvara Mahima Varnanam by Shiva

File name : puShkareshvaramahimavarNanambrahmAdyAkRRitAshivastutirevaMshivaproktam.itx

Category : shiva, shivarahasya, stuti

Location : doc_shiva

Proofread by : Ruma Dewan

Description/comments : shrIshivarahasyam | bhargAkhyaH panchamAMshaH | adhyAyaH 35|| 79-103||

Latest update : June 18, 2023

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanskript**.

February 1, 2024

*sanskritdocuments.org*

# ब्रह्माद्याकृता शिवस्तुतिरेवं शिवप्रोक्तं पुष्करेश्वरमहिमवर्णनम्

(शिवगौरीसंवादे)

—

ब्रह्माद्याः -
त्वं राजा मखभाङ्महेश सततं त्वामाह्वयन्तेऽध्वरे
सान्ना ऋग्य्गणयाजुषैः प्रतिपदं रुद्रोऽग्निरित्याह हि ।
त्वन्मायाधिगमेन मोहमतयः सर्वामरैस्तुल्यतां
दृष्ट्वा त्वामधिगम्य कष्टमखिलं त्यक्तत्वा प्रमोदामहे ॥ ७९॥

अहो देव मुग्धेन्दुचूड प्रसीद निषद्यादिबर्हिस्त्वमीशान तुष्टः । (निषादादि)
प्रकृष्टं महाकष्टजालं ममाघं हरस्वेश शम्भो प्रसीद प्रसीद ॥ ८०॥

यया मायया मोहमायान्ति सर्वे तवाङ्के निषण्णा भवानीति गीता ।
भवान्मायिमायी भवानादिकर्ता भवत्तोऽखिलं जातमेदद्विचित्रम् ॥ ८१॥

—

ईश्वरः -
इत्थं स्तुतोऽहं देवेशि तैस्तदा दर्शितं मया ।
रूपं त्रिलोचनं साम्बं नीलग्रीवं त्रिशूलकम् ॥ ८२॥

पुनः प्रणेमुर्मां दृष्ट्वा ब्रह्मविष्णुसुरा द्विजाः ।
तदा प्राञ्जलयः सर्वे मां स्तुवन्ति तदांऽबिके ॥ ८३॥

—

ब्रह्माद्याः -
विश्वाधिकस्त्वं भगवान्महर्षिः हिरण्यगर्भं जायमानं च पश्येः ।
सत्यं देवः शुभया माम हि बुद्ध्या नियोजयस्वाशु महेश शम्भो ॥ ८४॥

त्वत्तः परं नापरमस्ति किञ्चित्त्वत्तो नाणीयान्न समश्चाधिको वा ।
वृक्ष इव त्वं स्थाणुरीशश्च नित्यस्त्वया पूर्णं जगदेतद्विचित्रम् ॥ ८५॥

न जानन्ति वेदा न जानन्ति देवा न जानति त्वामात्मसंस्थं महेशम् ।
प्रकृष्टोरुपुण्यैर्यदि त्यक्तमोहो भवत्पादसक्तो भवेत्तस्य सिद्धिः ॥ ८६॥

—

ईश्वरः -
देवि तेषां स्तुतिं श्रुत्वा तानवोचं प्रहर्षितः ।
पुष्करे संस्थिता विप्रा मत्पादशरणास्तथा ॥ ८७॥

क्षेत्रिणो भवता पूज्यास्तथान्येऽपि मुनीश्वराः ।
क्षेत्रमागत्य यः कोऽपि क्षेत्रस्थान्पूजयेत्पुरः ॥ ८८॥

अथान्यानर्चयेत्पश्चाद्यदि पात्रानहो विधे ।
मद्भक्ताः शाम्भवश्रेष्ठा भक्तपूजा ममेष्टदा ॥ ८९॥

विहाय भक्तान्मय्येव अन्यं सम्पूजयन्ति ये ।
तैः कष्टं प्राप्यते ब्रह्मन्पुष्करेऽन्यत्र वा सदा ॥ ९०॥

पुष्करे त्वत्कृतो यज्ञः स्वाद्वन्नो बहुदक्षिणः ।
मत्प्रीतिजनको जातः फलं तेऽष्टगुणं भवेत् ॥ ९१॥

यस्तु पुष्करमासाद्य नानाधर्मगणं चरन् ।
तस्याष्टगुणितं भूयादिति मे व्रतमाहितम् ॥ ९२॥

एतत्कपालानुगुणं जाताः पूर्वं पितामहाः ।
सप्रजानि व्यतीतानि मन्वन्तरशतानि च ॥ ९३॥

अस्मिन्संसारचक्रे त्वं मा गर्वं वह पद्मज ।
प्रणम्य मां तदा ब्रह्मा तान्विप्रान्पूजयत्तदा ॥ ९४॥

गोभिरन्यैश्च वासोभिः शाम्भवान्पुष्करस्थितान् ।
स्नानार्थं सरसस्तस्मादानीतेयं सरस्वती ॥ ९५॥

ज्येष्ठं पुष्करमासाद्य तरङ्गावलिभासुरा ।
तत्रावभृथमासाद्य रराज स पितामहः ॥ ९६॥

सावित्र्या चैव गायत्र्या ऋत्विग्भिश्च सुरासुरैः ।
पुष्करेशं समभ्यर्च्य स्तोत्रमेतज्जगाद च ॥ ९७॥

—

ब्रह्मा -
यं विभेय विमृशामहे शतम् ।
निद्धामोऽञ्जलिजालव्रतैः ॥ ९८॥

अनेकविधि कल्पितं हर कपालमालाधर
हरस्व विलसच्छ्रुतिप्रभव पापतापापह ।
अखर्वजनिदुर्दशां प्रतिपदं विनाशाशुभं
महेश जनिमार्जनाद्भव भवादिबन्धं हर ॥ ९९॥

—

ईश्वरः -
स्तुत्वा मां स तदा ब्रह्मा प्रणम्याथ जगौ सुरान् ॥ १००॥

पुष्करे दुष्करो वासः पुष्करे दुष्करं तपः ।
पुष्करे दुष्करं दानं पात्रं तत्र सुदुष्करम् ॥ १०१॥

सरस्वती पुण्यतमा तदा याता महार्णवम् ।
कार्तिक्यां तु विशेषेण स्नानं पुण्यं हि पुष्करे ॥ १०२॥

सूतः -
इत्थं स वेधाः प्रजगाम चोक्त्वा देवैः स्वलोकं परमं मुनीन्द्रैः ।
यः पुष्करं संस्मरति दिने दिने न तस्य पापानि भजन्ति वृद्धिम् ॥ १०३॥

॥ इति शिवरहस्यान्तर्गते शिवगौरीसंवादे ब्रह्माद्याकृता शिवस्तुतिरेवं शिवप्रोक्तं पुष्करेश्वरमहिमवर्णनं सम्पूर्णम् ॥

- ॥ श्रीशिवरहस्यम् । भर्गाख्यः पञ्चमांशः । अध्यायः ३५॥ ७९-१०३॥

- .. shrIshivarahasyam . bhargAkhyaH panchamAMshaH . adhyAyaH 35.. 79-103..

Notes:

Having performed the MahaYagya at Pushkara Kshetra; Brahma, along with Savitri and Gayatri, worships Pushkareshwara Shiva. Shiva iterates the importance of worshipping at Pushkareshwara especially during Kartika-masa.

The shloka numbers have been maintained per the source text.

Proofread by Ruma Dewan

*Shiva Stuti by Brahmadya and Pushkareshvara Mahima Varnanam by Shiva*
pdf was typeset on February 1, 2024

Please send corrections to *sanskrit@cheerful.com*